उड्डामरतंत्रम्

नं० १०८१

143

नं० २०६९-क
उड्डामर तन्त्रम्
२४ पत्राणि

5838

F - 34

Complete

उड्डामरतंत्रम्

उड्डा
मरे॰
तं॰
१

उड्डामरेश्वरतंत्रम् ॥

ॐ नमो गणेशाय उड्डीशेन समाकीर्णो योनिहृदसमाकु
ला प्रणम्य शिरसा देवी गौरी पृच्छति शंकरं ईश्वर श्रोतुमि
च्छामि लोकनाथ जगत्प्रभो प्रसादं कुरु देवेश उड्डीशे यमार्थि
साधनं वशीकरणमुच्चाटं मोहनं स्तंभनं तथा शांतिकं पौष्टि
कं वाथ करणानि वहूनि च चक्षुर्हानिं महेशान श्रुतिहानिं त
थैव च ज्ञानहानिं क्रियाहानिं कीलकं च तथापरं कार्यस्तंभं
सुरेशान शोषणं स्तरणं तथा मंत्रध्यानं विशेषेण तत्सर्वं व
द मे प्रभो अन्यच्च विविधं कार्यं प्रसादाद्ब्रूहि भैरव यस्य विज्ञा
नमात्रेण मनुष्या भुवि दुर्लभः ईश्वर उवाच शृणु त्वं हि वरारो
हे सिद्ध्यर्थं यदि पृच्छसि तद्वदिष्यामि ते देवि तत्सर्वं सम्प्रदाय
तं गोपयेन्मंत्रजापेश्व विद्विहन्यान्न संशयः उड्डीशान्सारमाकृष्य
मयोक्तं तव भक्तितः श्रीपार्वत्युवाच उड्डीशं च नमस्कृत्य रुद्रं
चैव महेश्वरं कपर्दिनं विरूपाक्षं सर्वभूतभयापहं वक्ष्ये रु
द्रोद्भवान्योगान्सर्वशत्रुविनाशकान् तैस्तु प्रयोजितैः सद्यः
प्राणान्हन्ति न संशयः प्रथमं भूतकरणं द्वितीयोन्मादनं त
था तृतीये द्वेषणं वाथ तुर्यमुच्चाटनं तथा ग्रामोच्चाटं पंचमं
च जलस्तंभं च षष्ठकं वह्नेः स्तंभकरं वाथ वशीकरणमुत्तमं
अस्मानपि प्रयोगांश्च वदतः शृणु वरानने शिवेन कथितान्यो।

गा उड्डीशे शास्त्रनिश्चये ग्रंथीकरणं मूकीकरणं वपिरीकरणं
तथा भूतज्वरस्य करणं अस्त्रशस्त्रस्य हरणं जलदोषप्रशमनं।
दग्धोमध्यविनाशनं विनाशं मन्त्रकरणं गजवाजिप्रकोपनं आ
कर्षणं भुजंगानां मानवानां तथा ध्रुवं वह्नेर्विनाशनं कूपोत्सरणं
नौहिविनाशनं गर्दभस्यात्मकरणं परकायप्रवेशनं वेताल।
पादुकासिद्धिं उल्काज्वलनं तथा अन्यान्बहुप्रयोगांश्च रोम
लोमप्रहर्षणं विद्यामंत्रप्रयोगादीनां षण्णां भिचारिकान्
शुभाशुभान्तथा कार्यां वीक्ष्य तस्याः प्रयत्नतः उड्डीशयो न जानाति
स रुष्टः किं करिष्यति समेरुं चालयेत्स्थानात्सागरैः प्लावये
न्मही सूर्यं च पातयेद्भूमौ नेदं मिथ्या भविष्यति यथैवेंद्रस्य व
ज्रं च पाशं हि वरुणस्य च यमस्य च यथा दंडः कुबेरस्य गदा तथा
वह्नेः शक्तिर्यथा प्रोक्ता वज्रशूलनिकृंतने यथा यथा वायोश्चांकु
शं हि त्रिशूलं शूलपाणिनः स्कंदस्य च यथा शक्तिर्विष्णोश्चक्र
सुदर्शनं तथैते च महायोगाः प्रयुक्ताः शत्रुकारणे अनिवृ
त्ते निवर्तंते अमोघा नात्र संशयः सत्येन प्रयुक्तेन सिध्यंति
सविचारतः रत्नानां करणं वक्ष्ये शत्रुसाधनमुत्तमं येनैव कृ
तमात्रेण भूतो रुद्रानिमान् वै निवकाश्च समादाय चतुरंगु
लमानतः शत्रुविष्ठासमालिप्तं तथा नामसमालिखेत् वि
तागारेण तन्त्राग्राह्यपोदघान्यस्य हर्यारि चितानसंस्थितोभू
तायस्य गात्रमर्दाहेन् कुसुंभस्यांव तर्दपणामशोत्तरपात

३ उमरे श्वर तं २

जपेत् भूतो ग्रहज्ञानितं शीघ्रं मंत्रेणानेन मंत्रितः ॐ नमो भगव
ते सर्वभूताधिपतये विरूपाक्षाय निसंक्रूराय दंष्ट्रिणे विकरा
लिने ग्रहयक्षभूतवेतालेन सह शंकर मनुष्यं दह २ पच २ ग्र
ह्ण २ ग्रहणपय २ हुं फट् स्वाहा प्रत्यानयं यदीच्छेनत स्यैषा
क्रियते क्रिया लापयेद्देवमीशानं घृतेन वचया सह गुग्गुलेन
दद्द्रूपं घृतमिश्रं समंततः मंत्रेण मंत्रयित्वा ततः स्वास्थ्यम
वेकिल मंत्रः ॐ नमः शिवाय शांताय प्रभाय सूक्ष्माय देवाधि
देवाय सुभवाहृदेवायाधिशमय २ अमुकः स्वस्थो नवतु नमो
स्तुते इति स्वास्थ्यमंत्रः ॥
अथान्यं संप्रवक्ष्यामि प्रयोगं भुवि दुर्लभं येनैव कृतमात्रे
ण नरो ग्रहज्ञातिमानवे निंवकाष्ठाकृतिं कृत्वा चतुरंगुलमा
नतः तस्या हृदि विषोन्मत्तराजिकालवर्णेर्नाम संलिखेत्
छुच्छुंदरीमांसेन संवेष्ट्य मंत्ररूपेन रूपयेत् प्रकृतौ पाच्यमा
नायां मा ज्वनाश्चाश्वहीनरथान्त जपेत् ततः सप्तरात्रेण ज्वर
भूतेन गृह्यते अथ जपमंत्रः ॐ वकामुखी वाग्डामर अमुक
मा तीरमां मशोणित भोजिनी अमुकं खः २ त्रोरण गृह्ण २
ग्रहणपय २ हुं फट् स्वाहा प्रत्यानयं यदीच्छेनत स्यैषा।
क्रियते क्रिया गोदुग्धेन स्नापयेत् नामाक्षराणि तदास्व
स्थो भवेदिति ॥
अथान्यं संप्रवक्ष्यामि प्रयोगं भुवि दुर्लभं येन वित्तानमा।

त्रेण शत्रूच्चाटनं भवेत् ब्रह्मदंडी चिताभस्म गोमयभस्म
स्नारकाकजंघासमन्वितं क्षिपेत् शिरसि शत्रूणां क्षणेनु-
च्चाटयेद्रिपुं प्रत्यानयनं ततः स्नापयेदेनं गोक्षीरेण सम-
न्वितं मुंडनं चाथ केशानां ततः स्वस्थो भवेद्ध्रुवं ॥
अथान्यं संप्रवक्ष्यामि शत्रोरुच्चाटनं वरं रूपं निर्भेदकं नाम
स्वयं रुद्रेण भाषितं ब्रह्मदंडी समूलाच काकजंघासमन्वि-
ता निर्मोकं सर्पराजस्य रूपमुच्चाटयेद्रिपून् सर्पकंचुकमा-
दाय कृष्णोरगशिरस्तथा निखनेद्गृहस्य च द्वारे तमुच्चाटयते
द्रुतात् । ब्रह्मदंडी गृध्रमांसी कच्छपस्य शिरस्तथा श्मशा-
नभस्मसंयुक्तं कपाले माहिषे समं शत्रोर्द्वारे निखातेन
क्षणमुच्चाटयेद्रिपून् सप्तरात्रेण देवेशि समूलेन।
यणेन रुद्रम् ॥
अथ विद्वेषणं वक्ष्ये शत्रूणां शृणु शंकरि येनैव कृतमा-
त्रेण विद्वेषो जायते क्षणं ब्रह्मदंडी समूला च काकमांसे-
न संयुता जातीपुष्परसैर्भाव्या सप्तरात्रं पुनः पुनः ततो मा-
नारमूत्रेण सप्ताहं भावयेत्ततः पश्चरूपः प्रदातव्यः शत्रुगो-
त्रस्य मध्यतः यथा गंधं समाघ्राति पिता पुत्रैः समं कलिः
विद्वेषणं परं तेषां सत्यद्भिर्बांधवैः सह स्वस्थीकरणं के-
श्रोकं चूतगुग्गुलरूपतः ॥
अथ मारणं नरामानुषमांसस्य समदाय विचक्षणः

उ
डामरे
श्वर
तं. २

शृंगास्थिशत्रुविष्टाचहारमध्येनिखानयेत् सम्मोहेनभवेन्मा
रोययाकृद्रेणभाषितं । वस्त्रादंशी चितामस्मगुरमांसी समा
युते अरिष्टस्य वपत्राणि रिपुरूपरिमेवच मोहायवप्रयो
क्तव्याः शत्रूणांनामयोगतः समरात्रप्रयोगेन सर्वशत्रु
प्रणाशनं एतेषांदुष्टयोगानांनाशत्रुवेनदुदाहृतं शतम
ष्टोत्तरेणैव मंत्रयित्वाविचक्षणः ॐ नमोभगवते श्रीउड्
डामरेश्वराय अमुकस्त्रवाटय २ विद्वेषय २ स्वाहा एक
रात्रोषितोभूत्वाकृत्वाष्टम्यांसमाहितं देवमभ्यर्च्यईशानं
शतमष्टाधिकंजपेत् मंत्रमेतत्प्रयोक्तव्यंसिद्धयेसिद्धि
कामया शत्रुसैन्येप्रयोक्तव्यंराज्ञश्चविजयार्थिनः लांगू
लंहृदगोधायाश्चकलासस्यमस्तकं इंद्रगोपकसंयुक्तं
बुकस्यशिरस्तथा एतानिसमभागानिसूक्ष्मचूर्णानिका
रयेत् अमुकेहिप्रयोक्तव्यं सर्वजनशान्तहरेत् नकपालंस
मूत्रंवपेचकस्यशिरस्तथा वृश्चिकस्यतुलांगूलंहलाहल
कमेवच श्वेतमंडूकमांसंचमूत्रंवैवगजोष्ट्योः शरीरना
समभागानिसूक्ष्मचूर्णानिकारयेत् एतानिशोधयित्वा
तकल्केकृत्वापुनःपुनः ॐ ह्रीं यमाय शत्रुनाशनाय स्वाहा
अनेनपानेप्रदातव्यंरिपुसैन्यविनाशनं स्पृष्टमात्रेणतेनैववि
स्फोटास्तसंभवंततः नश्यंदेहेत्वास्त्रीबोधाभवेनीग्राववेदना
म्रियतेसमरात्रेणअस्मानयावर्जितः इंद्रेणचूर्णाऊर्यात् ॥

अथातं संप्रवक्ष्यामि यस्य ध्यानेन साधनं कथितं चैव रुद्रेण
त्रिदशेभ्यः प्रसादतः रुधिरं कुलसर्पस्य उष्ट्रकस्य तक्षकस्य वि
त कच्छपस्य मत्स्यशाणो शैवनेजातं जनेन तथा कुंकुमं मद्गु
लं वनगं कुलमेव च पत्राणि समभागानि ग्राह्यं केचन समा।
हरेत् अश्लेषायां तु पिष्टानि कृत्वा पश्चिमराजेन दशांशस्य प
येद्रूमांशं पश्चाद्ग्रहतलेपयेत् असिधारां गदानाम सर्वयरुद्रे
ण भाषिता अथालिपेत् गात्राणि संकृत्वा सर्वांगं यथापिवा
फलं दुष्टेन तथा पुत्रैः स्वपमनैस्तथैव च अगदोयं महामंत्रोप्र
मानो च भयावहः अनेन पाने मंत्रयित्वा प्रयुंजीत विधानतः
ॐ नमो भगवते रुद्राय शांताय दिव्ययोगाय दिव्यरूपाय।
जटिलब्रह्मचारिणि अगदोस्ति त्रिदशैव महाबलशांत मनो
हे ठः ठः स्वाहा। पीड्यमानो जपेन्मंत्रं शुचिर्भूत्वा समाहितः
अष्टोत्तरसहस्रं तु ततो मंत्रमिदं जपेत् कन्यायां पेषयेच्चैव
गोष्ठमध्ये प्रयत्नतः न दष्टाको विनाशोनत यथाशक्ति पुनः
पुनः स्वयं रुद्रेण संप्रोक्तं सर्वकार्यप्रसाधकः सर्वे चैव प्र।
योक्तव्याः सर्वशत्रुविनाशकाः तस्मात्सर्वप्रयत्नेन रक्षित
व्यः प्रयोगवान् अभुक्तेनैव भोक्तव्यो क्रूरे पापजने तथा दा
तव्यं भक्तियुक्ताय शान्ताय अमरेश्वरः इत्युड्डामरेश्वरे
महातंत्रे प्रथमः पटलः १
श्रीपार्वत्युवाच अथातं संप्रवक्ष्यामि जलस्तंभनमुत्तमं

उ॰ डामरे श्वर तं॰ ४

ॐ भीरवेल्लवं दंष्ट्रानि कृपिं रं मांसमेव च हृदयं कच्छपस्यैव
शिशुमारं पुनः पुनः विभीतकस्य तैलेन मर्दानेकत्र कारये
त् स्थापकर्म ततः कृत्वा जले तिष्ठेद्यथासुखं मण्डूकस्य संग्रा
ह्यं लत्वाप्यमकरस्य च डुंडुभस्य शिरो ग्राह्यं सर्वानेकत्र कारये
त् विभीतकस्य तैलेन पच्यमानेन वदापयेत् यमेतत्कर्म प्रकुर्वी
त समस्राहं तिष्ठेत जले न तैलं पाचयेल्लौहे कृत्स्नाष्टम्यां समाहि
तः चतुर्दश्यां सोपितो भूत्वा देवमभ्यर्च्य शंकरं अभिमंत्र्य च मंत्रे
णानेन निकारस्नानदन्तिणा अष्टाधिकसहस्रं तु जपित्वा होममा
चरेत् अनेन मंत्रयित्वा ततः सिध्यति नान्यथा । ॐ नमो भ
गवते उड्डामरेश्वराय जलं स्तंभय हूं फट् स्वाहा ।
अथ लूताकरणं वक्ष्ये तं शृणुष्व समासतः भल्लातकस्य सं
जाविषं चित्रकमेव च कपिकच्छुप्रेमाणि चूर्णं कृत्वा प्रदा
पयेत् पतत्सर्वं समायुक्तो लूताकरणमुत्तमं तत्स्पर्शप्रवसा
मिनां यतेयत्र लत्वेणः अंगानि स्रमभायाति मूर्छयंति नराऊ
र्जुहः पतद्रूपं भवेनस्य लूताविकृतलक्षणं विकित्सां तस्य च
स्यामि येन संपद्यते सुखं उशीरं चंदनं चैव प्रियंगुनागकेसरा
रकं चंदनं कुष्ठं च लेपो लूताविनाशनः ॐ नमो भगवते उड्डा
मरेश्वराय कुरु लीकुर्वाणी स्वाहा मंत्राभिमंत्रितं कृत्वा ततः
स्वस्थो भविष्यति । कृष्णसर्पशिरोग्राह्यं मुखेनलिप्तं सर्वपात
भल्लातकेन संयुक्तं कृष्णसूत्रेण वेष्टयेत् वल्मीकस्य मृदा ।

केशाग्रं तर्षमेन पाचयेत् कपिकच्छुकरोमाणि संयुक्तं षोड
शांशकैः विषस्य चूर्णीकृत्वा तत् शत्रूणां भूमिं निःक्षिपेत् श
रीरे भवसंते भुलूताकारणमंत्रमं प्रस्विन्नेवतनोगात्रेल
ग्नास्लस्मिंस्तसर्षपाः लूताश्चसविषाकुर्याज्ज्ञात्रकार्याविचा
रणा वेदनाजातमात्रेण मंत्रजापं तु एवं वत् एवं केन वि
धानेन स्वस्थो भवति एवं वत् ॥
अथ शस्य विनाशं च कथयामि समाहितः येनैव कृतमा
त्रेण वज्रं कृत्वा विचक्षणः तेत्रं संपातयेद्यस्मिन्नस्मिन्सस्य
विनाशनं महेन्द्रेण क्षिपेन्मंत्रप्रयोगेण तु मंत्रवित् अथ मंत्रं
शृणु वत्से प्रयोगं शुभयोजनकं अच्छेन्न रघातेनैव मंत्रेणानेन मं
त्रयेत् ॐ नमो भगवते उग्रनरेश्वराय वज्रविनाशाय वज्र
स्वरपतिराज्ञापयति हूं फट् स्वाहा इदं योगं प्रयुंज्यानो विधिपू
र्वेण कर्मणा पर्णानां चैव योगेन क्षिपेत्सर्वाणि विनश्यति ॥
शृणु चोच्चाटनं वत्से शृणुष्व शृणु यथातथा येनैव कृतमात्रेण गा
मस्योच्चाटनं भवेत् ग्रामे वनारिपंथानां मृदमादाय बुद्धिमा
न् गोमयेनाकृतिं कृत्वा ग्रामस्य वनगोदिशः चिताकाष्ठान
लं कृत्वा कोकिलाकाकपक्षकैः हत्वा वाहयति सा हस्तेन तो भ
स्मसमाहरेत् अभेदेन समस्तां सार्थं कृत्वा तु हिंस भस्मके शत
वारमभिजप्तेन अनेनैव तु मंत्रितः ॐ नमो भगवते महाका
लरुद्राय त्रिपुरविनाशनकारणाय हर हर २ धम २ धव २ मथ २

उ॰ डामरे श्व॰ तं॰ ५

मोहय २ उन्मादय २ उच्चाटय २ श्रीमहारुद्र आज्ञापयति
शङ्करी मोहिनी भगवती ऐं ऐं फ्रं फट् स्वाहा ग्रामे वा न
गरे वापि भस्मप्रक्षेपणेन च उच्चाटनं भवत्येव विस्तरेणात्र सं
शयः ह्रीं कृतं पुनर्भस्म नगरे वसन्ते पुनः ॥
क्लीबीकरणं वक्ष्यामि शृणु योगं समासतः येन योजितमा
त्रेण पुनः क्लीबो भविष्यति पादं पांशु समादाय कैरेनराचूतगो
मयैः वृषभस्य पुनः शृङ्गैः कृत्वा वै वाकृतिं त्रयः एकविंश
तिवारं हि मन्त्रेणानेन मन्त्रितः छेदयेन्नीव्रशस्त्रेण ततः क्लीबो
भविष्यति ॐ नमो भगवते उड्डामरेश्वराय कामध्वंसनाय अमु
कं छः छः । प्रस्थितानां करोणमध्ये चूर्णं कृत्वा अधस्थाने
प्रयोजयेत् स्नानाचमनार्घ्ये तेन ततः स्वस्थो भविष्यति ॥
क॰ अथ उन्मत्तीकरणं मूले कनकबीजस्य तेन चूर्णं समं ततः गृ
हवटकस्य विष्ठा चनपाथ्वी जेकरंजके एतदुन्मत्तकरं हठान्
भक्षणात्तर्पणात्रजेत् एकविंशतिवारं च मन्त्रेणानेन मन्त्रित
खानेपाने प्रदातव्यं उन्मत्तः स्यान्न संशयः ॐ नमो भगवते उड्डा
मरेश्वराय अमुकं उन्मादय २ छः छः स्वाहा । अजाक्षीरेणशो
णितेन पिबेच्छतपुष्पिका घृतेन सह वा पीत्वा ततः संपद्य
ते स्वस्थ इत्युन्मत्तीकरणम् ॥
एकविंशतिवारं हि मन्त्रितं लवणं पुरः करवीरककाष्ठाग्नौ
मन्त्रैर्होमं न पाचयेत् लवणं तेन संशयस्तं हरणं कृत्वा विचक्षणः

ल्गनेपानेप्रदातव्यंमंत्रेणानेनमंत्रितं मंत्रितंशतवारंश्चषष्ठा।
त्रोर्वायस्यकस्यचित् भक्षणाश्चभवेदंधोनात्रकार्याविचार
णा ॐनमोभगवतेऽड्डामरेश्वरायशंशीरंश्रंयंकुरुकुरु
ठः ठः स्वाहा ॥
अथान्यंसंप्रवक्ष्यामिकुष्टीकरणमुत्तमं येनसंपीतमात्रे।
णकुष्टीभवतिमानवः भल्लातकरसंशुद्धंजातफलामंडलका
रिका शृहगोधासमायुक्ताभक्तेपानेप्रदापयेत् समाहाज्ञा
यतेकुष्टंतत्पीतेवसमेपितं एतस्यशमनंकार्यंयथारुद्रे।
णभाषितं धात्रीखदिरनिंबानिशर्करासहितानिच वि
हृत्यमधुसर्पिभ्यांजीर्णेनिदापयेद्भिषक् शालिभक्तंप
टोलेवच्छुनयुक्तंनपायसं मांसंनस्तगयहृणेनशालियुक्त
मथापिच एतेनदत्तमात्रेणनरःसंपद्यतेसुखं जलजीवंत
मेष्टघ्नशोषयेदातपेनरः तस्यसंपदायेद्दोमान्मस्यरक्तेन
जीवंते श्रंगदाहेनतीव्रेणयमेनतेनष्टचेतसं यदीच्छेज्जीवि
तंतस्यअंगेप्रक्षालयेद्ध्रुवं पद्ममूलस्यचूर्णेनक्षालयेत्कांजि
केनतु तैलेनोद्वर्तयेदंगंक्षालयेदुष्णवारिणा अनेन
क्रियमाणेननरःसंपद्यतेसुखं ॥
अथान्यंसंप्रवक्ष्यामिवषणादिकरणंपरं येनविज्ञानमात्रे
णलोकोभवतिकिंकरः पुराणिकस्यहृदयंतथाकुष्टेन
भाषितं शिवनिर्माल्यसत्त्वचूर्णंयस्यमूर्ध्निविनिक्षिपेत्

उ
ड्डामरे
श्वरः
तं
६

नियतं किंकरो भूत्वा यावज्जीवं स तिष्ठति सप्तवारं मंत्रयित्वा मंत्रे
णानेन मंत्रवित् ॐ नमो भगवते उड्डामरेश्वराय सर्वाधिकारं साधय
य २ स्वाहा । चंदनं नागरं कुष्ठं प्रियंगुं नागकेसरं कुसुमं तगरं ।
पंचांगं समभागं तु कारयेत् छायायां वटिकां कार्यां मदेयां वा ।
नपानतः पुरुषो वाथ नारी वा यावज्जीवं न संशयेत् सप्ताहं मंत्रि
तं कृत्वा मंत्रेणानेन मंत्रवित् ॐ नमो भगवति मोहमालिनि ठः
ठः स्वाहा । शंखपुष्पी त्वथः पुष्पी तथा संकोचपुष्पिका श्वेता
परिजाकर्णी च सर्वं समांसं भावयेत् स्नुक्रेण समांशुकाला
नेपाने प्रदापयेत् नवशीकरणं प्रोक्तं यावज्जीवं न संशयः
वज्रवा अभयालोध्रं मंजिष्ठा हिंगुपत्रिका दिव्यं वचा विशाला
ताकं ग्रीवा सशोभना कुमारी न चांगलेपेन सप्तहस्तप्रमा ।
णतः ददाति दशमीनाव मत्तः कश्चित् प्रहृष्यते विषं सम पति
वेन नात्र कार्या विचारणा जलमध्ये महाचौरं कृत्ते वर्तिको
मम दधि मधु नवनीतं पिप्पली शृंगवेरं मरिचमपि न रघांस
समं मैं धवेन यदि भवति सरोषं तत्तकेणापि दष्टं गदमिदं
खलु पीत्वा निर्विषं तत्क्षणं स्यात् कुष्ठामृता चाति विषा हरिद्रा
तद्विलेपनं गरुडोक्तं विषहरं ॐषधं प्राणिनां जीवनं नेत्रकस्य
उलूकस्य गृध्रस्य महिषस्य च विडालस्य वराहस्य काकमेक
स्य च तथा मूषकस्य च नेत्रं च सत्सम चूर्णानि कारयेत् अने
नांजनेनेत्रा पिराजा पश्यत्यादिवा प्रेतं भोग्यमंत्रोयं मे

त्रहीनोनसिध्यति ॐनमःभगवतेरुद्रायशिवायज्योतिषांपत
येददातिज्योतिषामतिवीर्यकरणायस्वाहा। एकरात्रोषितो
भूत्वाकृत्वाष्टम्यांसमाहितः लिंगंसंपूजितंकृत्वाजलान्तेवाभि
मंत्रयेत् दक्षिणस्यांदिशिस्थित्वाशतमष्टोत्तरंजपेत् ततःसि
ध्यतिमंत्राणिअंजनानिसमंततः ॐनमोभगवतेउड्डामरेश्व
रायअंजनमंत्रसिद्धिंदेहिमेस्वाहा। इत्युड्डामरतंत्रेअंज
नाधिकारः

अथपिशाचीकरणं कनकस्यचवीजानिप्रियंगुगुग्गुलंतथा
आत्मानंधूपयित्वातुयोजपेद्ध्यानसंशदि योमोगंचसमाघ्राति
सवश्योजायतेध्रुवं कनकवीजानिश्वेतार्कचंदनकेशरंकु
ष्ठंचदेवदारुं सर्वमेकीकृत्य पिष्टंगलेनकार्यात् ततोयत्रयत्र
गच्छतितत्रतत्रजयोभवति इतिवशीकरणंनामद्वितीयःपटलः २
काकस्यपक्षंसंगृह्यसर्पकंचुकमेवच श्मशानभस्मसंयुक्तंश
त्रोरुच्चाटनंभवेत् इत्युच्चाटनाधिकारः ३

भूतवादंप्रवक्ष्यामियथागरुडभाषितं येनैवज्ञानमात्रेणश
त्रवोयांतिवश्यतां शत्रुनिर्यासमंसंगृह्यचूर्णमज्ञवतस्यच भा
वयेत्सप्तरात्रंतुभोजनैःसहदापयेत् दत्तमात्रेणतेनैवपिशा
चैर्गृह्यतेतमः स्वश्रीकरणप्रदानवाजयात्तमधुयष्टिका
निर्यासैःशालसंभूतैर्वीजानिकनकस्यच भावयेत्सप्तरात्रंतु।
भोजनैःसहदीयते ततोभक्षणमात्रेणग्रहैःसंगृह्यतेनरः प्रा

उड्डामरेश्वर तं. ८

7

केराडुग्धपानेनसुस्थोभवतिनान्यथा वास्तकस्यन्तुनिर्यासंवी
जानिकनकस्यच मर्दितापानतयामाभ्यांशृह्यतेब्रह्मराक्षसैः श्री
केराडुग्धपानेनसुस्थोभवतिनान्यथा कपिकच्छुकनिर्मांसंसमा
तवंगस्यवीजकं भावयेत्समरात्रंतुभक्तेपानेप्रदापयेत् ॐन
मोभगवतेउड्डामरेश्वरायमहेश्वरोनामस्वाहा। आमलीहरेणो
नस्त्रीदुग्धसहितेनसुस्थोभवति शर्करापद्मकिंजल्क पद्म
केसर कल्केनदुग्धेन सहदापयेत् तदादुष्टग्रहेभ्योमुक्तः
सुस्थोभवति इत्युड्डामरेश्वरतंत्रेहरपार्वतीसंवादेतृतीयः
पटलः ३ ॥

अथातःसंप्रवक्ष्यामिभूतवादंसुदुर्लभं येनविज्ञानमात्रे
णसर्वसिद्धिःप्रजायते ॐह्रींकालीकंकालीकिलकिल।
स्वाहा इदंमंत्रंपूर्वंसहस्रदशकंजपेत् ततःसहस्रंजुहु
यात् ततःकंकालीवरदाभवति सुवर्णमाषचतुष्टयं।
प्रत्यहंददाति।

अथसर्वजनमुखस्तंभनमंत्रः ॐह्रींनमोभगवतीउर्वच
नीकिलिवाचाभंजनीसर्वजनमुखस्तंभिनीह्रांह्रींह्रूंह्रैंह्रौं
ह्रः स्वाहा। अनेनमंत्रेणविल्वसमिधंघृताक्तंसहस्रहवनं
कुर्यात् समस्तजनपदाःकिंकराःभवंति एतन्मंत्रेणया
दिम्बग्रीयसमिधंघृताक्तंसहस्रैकंहोमयेत् तदास्त्रीवश्यं
भवति ॐऐंह्रींह्रंह्रूंऐंवदवदवाग्वादिनीवागीश्वरीनमः

स्वाहा। अनेनमंत्रेणसहस्रजप्तेनकवित्वंकरोति नात्रसंदेहः
ॐॐॐईंईंईंऐंऐंऐंनमःस्वाहा। अनेनमंत्रेणदशसहस्रजप्ते
न कवित्वंकरोति इत्युड्डामरेश्वरतंत्रेमहादेवपार्वतीसंवा
देचतुर्थःपटलः ४ ॥
शृणुदेविप्रवक्ष्यामियथात्रैलोक्यमोहनं परपुरुषावशं
यांतियथावत्कथयामिते पलाक्षंचलोध्रंचवचाचरक्तचं
दनं श्मशानभस्मसंयुक्तंप्रयोगंमारणांतकं। मारणं।
संकोचकरणं। कुलत्थंविल्वपत्रंचरोचनाचमनःशिला
एतानिसमभागानिस्थापयेत्ताम्र भाजने सप्तरात्रेस्थिते
पात्रेतैलमेभिःपचेद्बुधः तैलेनभगमालिप्यभर्तारमुप
गच्छति संप्राप्यमैथुनंभर्तादासोभवतिनान्यथा नागरैर्मधु।
संयुक्तैर्गुटिकांकारयेद्बुधः अस्यमूत्रेणसंयोज्यपुरुषाणांवशंक
रं ॐॐमंशतपुष्पंचप्रियंगुरोचनंतथा अजाक्षीरेणदातव्यंयाभा
र्यादुर्भगाभवेत् ततःसासुभगानित्यंपतिदासत्वमाप्नुयात् मा
तुलुंगस्यबीजानिपंकजस्यफलानिच मधुदुग्धेनरक्तचूर्णंमधुनास
पेषयेत् तैलयोजितमात्रेणपतिर्दासोभवेद्ध्रुवं।
अधुनासंप्रवक्ष्यामियोगानांसारमुत्तमं येनवितानमात्रेणनारी
भवतिकिंकरी उशीरंचंदनंचैवमधुनासहसंयुतं गजहस्तप्रयो
गोयंसर्वनारीप्रयोजकः केवलेशशिनायुक्तंॐॐमंलेपयेद्भगे
नित्यवज्ञायतेसांगंजायतेयोनिसंवयं लवंगसैंधवंतीक्ष्णपिप्प

उ॰ डा॰ मे॰ रे॰ तं॰ ८

8

लोमरिचानि च नरस्य लेपयेल्लात्रे सम भवेत्कजहस्तवत् वरस्त्री वेश्मसं॰
वानं शीततोयेन पेषयेत् तेनैव लिप्तमात्रेण भगेरंध्रो न जायते त
त्रश्वत्तालितेनाथ प्रसवकं भविष्यति यःस्वेरतःसमादाय रंतांते सव्य
पाणिना वामपादं स्त्रियो लिंपेत्सा तस्य वशगा भवेत् या भोगशो
कांतस्य लिंगं वामांघ्रिणा स्पृशेत् यावदायुर्भवेद्दासः सतस्या नात्र
संशयः कपोतविष्ठासिंधूत्थमधुकैः समभागिकैः लिप्तालिंगम
वेद्यांतसा वशा स्याद्वरांगना घनसारं सतल्लं च मेघं च मधुनासह
पिष्ट्वा लिप्ता रजो यां च भजेत्सा वश्यगा भवेत् गोचनाकणकं शंभु
वीजं कर्पूरचंदनं एभिर्विलिप्तेस्सिद्धार्यं भजते सा वशा भवेत्
इति श्रीउड्डामरेश्वरमहातंत्रे लिंगस्थूलीकरणभगसंकोच
नेनाम पंचमःपटलः ५

कृष्णछागरोम कृष्णमार्जाररोम कृष्णकाकरोमाणि कृष्णाष्ट
म्यां कृष्णचतुर्दश्यां वा शनिभौमयोर्वारे अश्लेषा नक्षत्रे आर्द्रा
नक्षत्रे वा समभागानि कृत्वा कृपत्रऽगानदीपयसा पेषयित्वा
गुटिकां कृत्वा संग्रामे वो पविशेत् रणपांशुना तिलकं कुर्यात्
अर्द्धानेन नरे ये ऽस्य पुरुषा दर्शनं कुर्वंति ते कंपयंति मूर्छयंति
उत्पतंति पलायंते ये पिष्टलेपं कुर्वंति तेषां वृश्चिका पिपतंति
येमुंचति एषयोगो मया प्रोक्तो देवानामपि दुर्लभः अयंयोगः
कस्यापि न निवेदनीयः

अथातःसंप्रवक्ष्यामि शरीरस्तानमुत्तमं येन विज्ञानमात्रेणता

यतेचशुभाशुभंजीवितंमरणंचैवलाभालाभंजयाजयं सुखदुः।
खंभवाभावौगमनागमनेतथा हिमालयस्यतनयाहिपृष्टवान्।
सम्बंधजं अथपृथिव्यप्तेजोवाय्वाकाशानितत्वानि तत्र गुरोहृदय
मादेनप्रमादेनशास्त्राणिच येनयोगेनातीतेनत्रैलोक्यंसचराचरं
जातमेवपृथ्वांसमयोगानि स्थूलसूक्ष्माणिकथ्यते सचसंप्रेत्यचे
ष्टायांलक्ष्यतेतस्याः किंनामतस्यचकार्जितासातथापड्च्यते वा
दुः ततः पंचतत्वानिपश्यते संप्रतिहृतोयदागत्यवदति तस्यवा
गुदेतिपंचतत्वान्तराणि तावायस्यतत्वान्तरस्य वक्रेतत्वान्तरा
णिभवति प्रश्नचितायांसततंजपति यदिप्रश्नचिंतायांपृथ्वी
तत्वान्तराणिभवंति तदापृथ्वीतत्वंभवति यद्येषामधिकाभवं
ति तदापानीयतत्वानिभवंति तत्वान्तराणीत्यर्थः अआइईउऊ
ऋॠऌॡएतानिपृथ्वीतत्वान्तराणि एऐओऔअंअः एतानिज
लतत्वान्तराणि कखगघङ चछजझञएतानितेजस्तत्वान्तरा
णि टठडढणतथदधनपफबभमएतानिवायुतत्वान्तराणि
यरलवशषसहक्षएतानिआकाशतत्वान्तराणि एतानिवर्द्धित
वाक्येनाधिकान्तराणिभवंति विविधप्रकाररचिताः समविषमा
न्तराणिज्ञातव्या इतिजीवितमरणलाभालाभजयपराजयसु
खदुःखगमनागमनानिच यानिसमानिविषमाणिअएतत्वानि

निर्वाचितव्यानि यदाचिन्तं भवति कृतस्य वा कार्यविषये पृथ्वीवि
षये तदा सलिलतत्त्वान्तराणि भवन्ति तदा मन्त्रं जपति अपवि
त्रायां यदा पृथ्वीतत्त्वान्तराणि भवन्ति तदा पृथ्वीतत्त्वं भवति एवं
मन्त्रेष्वपि वोद्धव्यम् अन्तराणि येन कथयति लाभचिन्तायां ते
ज आकाशान्तराणि अधिकानि भवन्ति तदा तेः शुभोऽधिकतरो
भविता यदा देशान्तराद्वा हागमनाधिकं तेजसः ग्रामचलिते संग्रा
मगमने अहेन अर्के उके तेजसोन्तराणि अधिकानि भवन्ति पृथि
वी अप् तेजो वायु आकाश एतेषां अन्तराणि विवाहकाले ए
तेषु तेजोन्तराणि शुभहारकानि भवन्ति इति श्री उड्डामरेश्वरम
हातन्त्रे महादेवपार्वतीसंवादे सम्पादो नाम पंचमस्तानेक।

षष्ठः पटलः ६

अथौषधीकरणं निरूप्यते । औषधीपरमा श्रेष्ठा गोपितव्या
प्रयत्नतः यस्याः प्रयोगमात्रेण देवता यान्ति वश्यतां औषधी।
सा च यैः प्रोक्ता चांडाली लोकविश्रुता सुरासुरगणैः पूज्या सर्व।
कार्यार्थसाधिनी एकपत्री द्विपत्री च त्रिपत्री तुर्यपत्रिका अने
न विधिना देवि चतुष्परणगामिनी मनुष्याणां विशेषेण वशी
कर्माणि योजिता एकपत्री तु संग्राम मलसंयुक्ता स्त्रियं वशमा
नयति त्रिपत्री श्रीशाकमरिचसहिता दुष्टं वशमानयति ।

वतः पत्रीवकंउसहितामन्त्रउष्टगजंवशमानयति ।
अथोत्पाटनविधिकथ्यते शनिवारेशुचिर्भूत्वासायंसंध्यादिकं
विधाय गंधपुष्पधूपदीपनैवेद्यादिभिः पंचोपचारैः पूजादि।
कंविधाय अक्षतंफलंहस्तेगृहीत्वा औषधीसमीपेस्थित्वा अ
भिमंत्रणंकुर्यात् ततोऽन्यदिनेभानौखदिरकाष्ठकीलकेनखन
येत् तत्रमंत्रः येनत्वांखनतेब्रह्माहृषीकेशोमहेश्वरः शची
पतिःपितृपतिर्जलेशश्चधनाधिपः तेनत्वांखनयिष्यामितिष्ठ
तिष्ठमहौषधिः इतिपठित्वाखनयेत् शुचिरारभ्य पकांतेप्रभा
तेमंत्रयुक्तितः संग्राह्यमौषधंसिद्धौनभवंतिहिकाष्ठवत् ॐन
मोस्तुतेऽमृतसंभूतेवलवीर्य्यविवर्द्धिनि वलमायुश्चमेदेहिपा
पंमेनयहरत्वतः येनवाग्रेनमंत्रेणखनित्वात् पाठमानंकृत्वा
यः एवंमानीतोयोन्यथाभवेत् अत्रैवतिष्ठकल्याणीममकार्य
करीभव ममकार्यकृतेसिद्धेइतस्त्वंहिगमिष्यसि ॐ ह्रीं रक्त
चामुंडेहूंफट्स्वाहा अनेनमंत्रेणपुष्पार्केहस्तार्केवानक्षत्रेस।
र्वोवौषधीउत्पाटनीया येनराज्ञवाउदितेभानौऔषधानिखन्यते
उत्पाट्यते उत्पद्यते वा तेषां रविकिरणपीतप्रभावोनावीर्य्यप्र।
भावोभवति सिद्धिकारकान्भवंति यद्युदितेभास्करेउत्पाट्यते
तदा तेषांपूजाकर्तव्या जवारक्तोत्पलरक्तकरवीरस्त्रवंदनकुं

ऊमेन गव्यगोमयेन सपादहस्तभूमिं संशोध्य तन्मध्ये चतुरस्रं
कारयेत् रक्तचंदनकुंकुमाभ्यां तन्मध्ये वर्तुलं वितस्तिमात्रं भा
नुं तन्मध्ये पूजयेत् ततो रक्तभक्तपुष्पैरक्षैः वक्ष्यमाणमंत्रेण
बलिं दद्यात् ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः सः स्वाहा अनेन मंत्रेण पूजां
कृत्वा उत्थापयेत् वीर्ययुक्ता भवति सर्वकार्यक्षमा भवति इत्यु
ड्डामरेश्वरे महातंत्रे तंत्रराजे महादेवपार्वतीसंवादे वउ
ली सप्तमः पटलः ७ ॥

अथातः संप्रवक्ष्यामि नारीणां गर्भधारणं पद्मबीजं गव्यपय
सा सह या नारी पिबति सा गर्भवती भवति सत्यमेव आदित्य
वारे निमंत्रयेत् चंद्रवारे भक्षयेत् पूर्वादिभागस्थितशारीशाखू
लं गव्यघृतेन सह श्वेतसमये भक्षयेत् सा संवत्सरेण गर्भव
ती भवति अनपत्या च या नारी कपित्थं भक्षयेत्सदा अभिमंत्र्य
तं मंत्रेण सापि पुत्रवती भवेत् एकवृत्तनटेन नारी स्नानं कृत्वाभि
मंत्रयेत् आदिवंध्यापि देवेशि भवेद्गर्भवती हि सा देवाशिवा
भवेद्यत्र नदीसंगमसन्निधौ तस्यां नद्यां दिशि स्वाहा वंध्या पु
त्रवती भवेत् ॥

विधिः प्रोच्यते कपिलागोमयेनाथ भूमिं लिप्य प्रयत्नतः
स्नात्वा विधिप्रकारेण मंडलं कारयेत्ततः चतुरस्रं चतुष्कोणं

तन्मध्येवर्त्तुलंस्मृतं तन्मध्येविलिखेत्मध्यात्अष्टपत्रंसकर्णिकं
मध्येतत्पूजयेद्देवं पत्रेशक्तिंप्रपूजयेत् निर्व्रणंमंडलस्याग्रेक
लशंस्थापयेद्बुधः शिखिपत्रनखवर्णेनलिखेत् शृंगनाक्र।
ल सप्तपर्वतमृत्तिका ` ` ` ` ` ` ` ` ` समलामृतिका वा
ल्मीकमृत्तिका निंबमूलमृत्तिका सवर्णरजतताम्रकांस्य
तरुस्तम्भूलसर्वतीर्थः ॐसमुद्रःसरितःसर्वाःसर्वौषधयः
सर्वदेवताःसर्वसिद्धयः सर्वयोगिन्यः सर्वेगीताः सर्वेना
गाः पंचजात्यानि फलानि पंचप्राकारात्तनानि पंचरत्न।
वर्णपुष्पाणिस्थिरचित्तेनमंत्रितकलशंपरिकल्पयेत् ।
अथमंत्रः ॐक्लांक्लींक्लूंक्लैंक्लौंक्लः अनेनमंत्रेणयानारीवि।
धानेननिरंतवर्जिता आब्रह्मचारिणीदेवीवंध्यापंचपति
वर्जिता अपुत्रालभतेपुत्रान्दुर्भगासुभगाभवेत् अनेनैव।
विधानेनकन्याप्राप्नोतिसत्पतिं मंत्रौषधिप्रयोगेष्वथवा
संकीर्णकाः नवाभिचारिताःक्रूराःशुद्धदेहाभवंति
ते येचान्येविघ्नकर्त्तारश्चरंतिभुविरात्रसाः तेसर्वेप्रलयंया।
तिसत्यंदेविमयोदितं सकृदुच्चरितेमंत्रेमहापुण्यःप्रजाय
ते ब्रह्महत्यादयोदोषाःक्षयंयांतिनसंशयः ॥
अस्यमंतेनउद्यंते नागकेसरमासे १ गव्यघृतेनसहस्रत

स्नानदिवसेपिवेत् तदनंतरंभर्तासहरात्रौसंयोगंकुर्यात् साअ
वश्यमेवगर्भवतीभवति ॥ अथद्वितीयोपायः श्वेतगौरामासे
रात्रौमृण्मयपात्रेजलेन सहनिशाधरणस्थानेसमग्ररात्रौस्थापये
येत् अग्रिमदिवसेशिलायांपिष्ट्वा पर्युषितजलेन या स्त्री ऋतु
स्नानदिवसेपिवेत् ततोरात्रौचभर्तासहसंयोगंकुर्यात् सा
अवश्यंगर्भवतीभवति ॥ अथतृतीयोपायः। दकाल्वअदी
पिदशमासे १ं गव्यदुग्धेनसहयाऋतुस्नानदिवसेपिवेत्
तदनंतरंभर्तासहरात्रौसंयोगंकुर्यात् अवश्यमेवसागर्भव।
तीभवति इतितृतीयोपायः ॥
ॐयंदाकर्णाय स्वाहा। इमंमन्त्रयाजप्त्वा ग्रामे नगरे वा प्रवि
शेत्ग्राममध्येविशिष्टंभोजनंप्राप्नोति अमन्त्र मोअल्पमेसि
द्धा अनेनाष्टोत्तरशतंजपेत् शिरीषमूलेमुद्रातेत्रस्य चतुष्को
णेष्वमोत्तयेत् तदाशशाकमूषक वराह चतुष्पादः प्रभृती
नांस्तम्भनंभवति ॥ अधुनासंप्रवक्ष्यामिमन्त्रान्मेफलदा
यकाः येसिध्यंतिदर्शनान्मंत्रसाधनभक्तिदाः शत्रुमित्रंतथोदे
शासाध्यसिद्धस्यलक्षणं मंत्राक्षराणिलिखित्वासाधकस्यतस्य
तथापिवप्रथमवर्गान्तरोभवति तथामित्रंद्वितीयवर्गान्तरोभव।
ति तदासिद्धिः तृतीयवर्गस्ययदाभवति तदासाध्यः चतुर्थवर्गो

त्तेरोयदाभवति तदाउदासीनः पंचमवर्गात्तरोयदाभवति तदाश
त्रातव्यः एतेभेदाःएतांज्ञात्वामंत्रशोधनमारभेत् तदासाधका
नोमृत्युर्वश्यो भवति अथकल्पवृत्तशिफमूलानियानिप्रक्षालयि
त्वा गव्यस्थिमिश्रितायां गंजिकायां संस्काराणिकार्याणि त
तोनियमएवैकंभक्षयेत् निर्व्यापियोगेइच्छेयस्मृत्वेनियोजये
त् विधानमस्याब्रवीमीतिदेवीम् ।
अथमंत्रः ॐनमःषण्मुखायशक्तिहस्ताय मयूरवाहनायॐ
षष्ठीकेनदेहिमेवस्वाहा। अनेनमंत्रेणचतुर्दशपर्णाभिर्विमृश्य
मयूरशिखामुत्पाटयेत् तदामहाप्रभावयुक्ताभवति गव्य।
घृतेन सहसंमृष्यते तदा इंद्रियवलो इंद्रतुल्यो भवति पं
चमेनस्वर्णकारोभवति अन्यच्च श्वेतकरवीरमूल श्वेतगि
रिकर्णिकामूल देवचनाद्.भीकृतजातांजली पंचमलन
मायुक्ता खानेपाने प्रदातव्या मरणांतवशीकरणम् ॥
अन्यच्च श्वेतगिरिकर्णिकामूलं स्ववीर्येण सह स्वकीय
पंचमलहरवीर्यः श्वेतार्कमूलं एतानि हस्तार्द्रे पुष्यार्द्रे वा
एकीकृत्वा कुमारिकाहस्ताभ्यांमर्द्दयित्वा अष्टम्यां वा चतु
र्दश्यां गजमदेनसहहस्तेगुटिकांकारयेत् यस्यैएकापि।
दीयते सावश्याभवति नान्यथा पुरुषएतेपिसर्पाणांदीयते

उ
डामरे
श्वर
तं.
१२

तेमपारपि रम्याभवंति। श्रीमहाभैरवस्यवचोयथा ॐ॥मे
न सहदीयते तदावैराजोवशीभवति रोचनयाॐ॥मेनसह।
यदातिलकंक्रियते तदासास्त्रीदृष्टतोलग्राभ्रमति गुरुदारां
तिलकोनदर्शयितव्यः राजद्वारेतथान्यायेविवादेयुद्धे जा।
यावदे त्रैलोक्यमोहनमेतत् ।

त्रिफलामासे ४ निंब १ वकाइल कदंव २ नीप ३ मिराश्ना ४
करंज ५ भृंगराज ६ मयूरशिखा ७ एतानिसमभागानिसूक्ष्म
चूर्णानिकारयेत् तदनंतरंमधुनासहलेपयेत् भोजनंनवय
याहारं कुरुतेनात्रसंशयः एतच्चूर्णमरेभ्योपिदुर्लभं रवि
चूर्णं शिरीषवल्कलचूर्णंच गव्यघृतेन सहयस्यैवनितायै
ऋतुस्नानदिवसेपानार्थंदीयते सा स्त्रीवंध्यापिगर्भवतीभ
वति नात्रसंशयः एतच्चूर्णंकपित्थफलेन सहऋतुसमये
अपुत्रवतीभक्षयति सास्त्रीपुत्रमाप्नोति एतच्चूर्णं श्वेतकंका
लीमूले लक्ष्मणाचूर्णंचसमंकृत्वा ॐ॥मकायेनसहऋतुस
मयेसदाभक्षणार्थंदीयते तदातस्याःशरीरशुद्धिर्भवति पश्चा
त् ऋतुसमयोपरिपंचदिनानिभक्षयेत् तदासागर्भधारणक्ष
माभवति नात्रसंशयः इतिडामरेश्वरेमहातंत्रेमहादेवपार्व
तीसंवादेमयूरशिखाअष्टमःपटलः ८ ॥

12

अथान्यत्संप्रवक्ष्यामि औषधं परमदुर्लभं आस्फोटीनामविख्याता।
नागदमनीति विश्रुता अस्याविधानं वक्ष्यामि विषाः सर्वे विनश्यन्ति
लेपनाद्भक्षणान्नस्यात् पुत्र हस्तौ तां प्रलिप्य सर्पो धार्यते ध्रुव
मात्रं सर्पेणनन श्यति नैव तत्‌नानि प्रलिप्य नागरञ्जितमंत्रेण स।
र्पो विनश्यति नागदमनीमूलं खननात् नाडी ललाट लेपनात्तना
शयति समंततः आमवातं पित्तवातं श्लेष्मवातं पतेवातान्विन।
श्यंति भक्षणान्नात्रसंशयः ॥ अथ कथयामि औषधी करणे करण
कारणानि। पुत्र मय वशीकरणकारक पुत्र पुत्रैकं संकान्तापि।
वशं परं महिलाजनस्य एकशत्रपस्य दीयते सापतिं परित्यज्ये
पश्यंतां लोकानां नग्ना भूत्वा भ्रमति ॥
अथ कथयामि तान्त्रिक विधिं ताम्रवेदी परोर् इति लोके कथ्यते
शनिवारे नाम अभिमंत्र्य दिगंबरो मुक्तकेशो भूत्वा अनुदिते भानौ
ग्रहणं कुर्यात् पिष्ट्वा समस्तकाकारेण स्त्री पंचमलेन च कर्मान्तरे
ण कृत्वा तांबूलेन सह भगिनी कृत्वा दीयते सा वशा भवति ना।
न्यथा मातापितृपुत्रं परित्यज्य तत्परा भूत्वा एष मोनग्ना भवति य
त्र कुत्रापि तथा तं अनुयाति न संशयः काकजंघेति विख्याता ग्रामे
सर्वत्र तिष्ठति शनिवारे संध्यासमये तस्या अभिमंत्रितं कुर्यात् तद
नंतरं ब्राह्ममुहूर्ते उत्थाय अनुदिते भानौ पुष्यार्के हस्तार्के वा योगे

खदिरतिलकेन तां समूलां उत्पाटयेत् पुनस्तं सप्तम्यां अष्टम्यां नव
म्यां वा एतास्तिथीषु पुनर्वसुपुष्यहस्तार्द्रायुक्तासु स्वपंचम
लेन सह पिष्ट्वा स्ववीर्यं स्वरक्तं अर्पितम्मिन्दत्वा यस्यै वनितायै दी
यते सा स्त्री वशा भवति सप्तमेव मंत्रेणानेन मंत्रयेत् ॐ नमो भग
ति त्रिपुरे त्रैलोक्यमोहिनि ऐं क्लीं ह्रीं क्रीं सौः अमुकनाम्नी स्त्रीं मे वश
मानय स्वाहा इति मंत्रः ॥ अथ गुंजाकल्पो लिख्यते श्वेत
गुंजा शनिवारे संध्यासमये निमंत्रणं कृत्वा ततो ब्राह्मे मुहूर्ते उत्था
य अनुदिते भानौ खदिरकीलकेन दिगंबरो भूत्वा समूलां गुंजा
मुत्पाटयेत् पुष्यार्के हस्तार्के वा स्त्रीपुष्पेण सह गोरोचकाश्मीर
कुंकुम श्वेतचंदन रक्तचंदन कस्तूरी कर्पूर हस्तिमदेन सह अभि
मंत्र्य तिलकं कुर्यात् तदा स्त्री कामबाणविमोहिता विह्वला भवा
ति मंत्रणानेन मंत्रयेत् ॐ ऐं ह्रीं श्रीं क्लीं क्रूं फट् स्वाहा इति काम
बाणतिलकम् ॥

अथान्यतंत्रोक्तं वशीकरणादिकं लिख्यते । मारगुह्नमस्तेपा
वशीकरणमोहने कामिनां प्रीतिजनकं किंचित्तदपि गद्यते
न ज्ञाते तिलकविधिः लज्जां च मधुकं कटुं नलिनीमूलमेव च
एतान् पिष्ट्वा स्ववीर्येण यः कुर्यात् तिलकं पुमान् तत्क्षणादेव व
यति वश्यतां भुवनत्रयं वात्स्यायनेन मुनिना प्रोक्तं योगमनुत्तमं

सिताष्टमूलमंजिष्ठवचाशुक्लाकुष्ठका स्त्रीयोनिशोणितैश्चैतदेकी
कृत्यललाटके शुभ्रेतिलकमाचरेद्यः सलोकत्रयंक्रमात् कृतज्ञः
स्ववशंकुर्यान्मोदतेचचिरंभुवि नगरंपिप्पलीमूलंमेषीशृंगीकण
जटा एतत्समंसर्पचांगमलेनीतैकत्रांशुधीः मधुनातिलकंकुर्या
द्यः दौर्णीस्तनवासेरजगत् सर्वंवशीकुर्यात्सप्तमात्रान्नसंशयः गो
रोचनंचसंभाव्यसप्तमात्रुधिरेणया कुर्यात्सातिलकंभालेपतिंच
मोहयेन्नृपम् ॥ अथांजनविधिः महाष्टमीदिनेयस्तुश्मशा
नेनरमस्तके पातितंकज्जलंविंघमोहयेन्नयनांजनं रोचनाकेसरं
कन्याशिलांचेतिविशोषयः योजयेद्दृष्टिपथगंसर्वमेवविमोहयेत्
तालीशकुष्टनागैरैः कृत्वादौर्णीशुवर्तिकां सिद्धार्थतैलेनिःक्षिप्य
कज्जलंनरमस्तके पातयेदंजनंतस्यसर्वदाभुवनत्रयं दृष्टिगोचर
मायान्तःसर्वेभवतिदासवत् शिलाकिंजल्कफलिनीरोचनानां
तथांजनं पुष्यार्केयोगविहितंदर्पणोमोहनेपरः ॥
अथचूर्णविधिः। काकजंघाशिलापत्रोभ्रमरोकुसमुत्पलं चू
र्णितनगरंजंचैषाचूर्णक्षिप्तंविमोहते वानपैत्तिकदलंपुसोमलेमा
लामवस्व पत्रावलेरिदंचूर्णक्षिप्तंशिरसिमोहनम् ॥
अथभक्षणविधिः मंत्रादिसर्वनिष्कास्यएवंजरीटोदरंकुलेः पू
रयित्वास्ववीर्येणसारमेयगलेक्षिपेत् मृष्टांकृत्वातदेकांतेसमा

उ
डामरे
श्वर
तं०
१५

हेधारयेत्सुधीः पश्चान्निष्काश्य संशोध्य वटीं कृत्वा हि शोषयेत् साभक्त
णविधानेन दीपमालापरस्परं दंपत्योः प्रीतिजननी कीर्तिता नियमो
त्तमा अत्युत्तमतम् ॥
अथान्यत्सम्प्रवक्ष्यामि तिलकं सर्वकामिकं गोरोचनं वंशलोचनं मत्स्य
पित्तं काश्मीरकुंकुमं केशर स्वयंभूकुसुम सवीर्यः श्रीखंड रक्तचंद
न कस्तूरी कर्पूर काकजंघामिलानि एतानि समभागानि कृत्वा कु
एतद्गंगनदीजलेन मर्दयित्वा कुमारिकां पार्श्वकां गुटिकां कृत्वा
छायायां शुष्कां कारयेत् तया ललाटे तिलकं कृत्वा यां यां स्त्रियं प
श्यति सा वशा भवति । ह्रीं वां यां ल्रीं श्रं कं छः अनेन मंत्रेण महि
षास्थिमयं एकोनविंशत्यंगुल सहस्रेणाभिमंत्रितं तस्यनाम्नाकृ
एतटे निखनेत् सम महिषेण वध्यते । ॐ छः छः ल्रं अं कं कं रं छः
छः ॐ अनेन मंत्रेण मयूरास्थिमयं कीलकं अंगुल सहस्रेणा
भिमंत्रितं यस्य नाम्ना वतुष्ठ्ये निखनेत् सततं भ्रमति तत्र अनेनै न
अवतिष्ठति पर्यटति क्षणमात्रेण उत्कीलनेन शान्तिर्भवति । ॐ
श्रीं श्रीं श्रां श्रीं रं रं ल्लः छः स्वाहा अनेन मंत्रेण मेषास्थिमयं कीलकं
द्वादशांगुलं सहस्रेणाभिमंत्रितं कृत्वा यस्य गृहे निखनेत्
तस्य सर्वसिद्धिमसिद्धा भवति ।
ह्रीं वं एकपञ्चमं काशं ध्यानत्वं मंत्रदीपके कुंभकेन वशरोहे ।

शृणुवक्ष्यामिषड्गुणं ध्यानात्तुमासमेकंतुमहल्लीमानयेद्ध्रु
वं मासेनैकेनमन्त्रेणाआनयेन्नागकन्यकां देवकन्यांत्रिभिर्मासैः
सायाह्नेनान्यथाभवेत् ॐ हं हः अनेनैवतुमंत्रेणध्यानमाःक्रो।
धयाजकाः याज्ञस्यरुद्रसंकाशंरुद्रहस्तेस्वरास्त्रैः मासेनमात्र
षंलोकेनागलोकेद्विमासतः त्रिभिर्मासैस्तुदेवेशिस्वर्गलोकं।
नसंशयः षण्मासाभ्यांप्रयोगेनत्रैलोक्यंनिश्चलंकृत ॐ रक्त
हस्तारक्तगात्रा मुकुटधारिणीपचतिस्वाहा। मंत्रराजउलटावे।
धा। ॐ ह्रीं श्रीं श्रीं विकृताननावाह्ये फट् स्वाहा। मंत्रमिदं
यंत्रेलिखित्वा यस्यईस्तिनेदीयते सप्तकाह्निक द्व्याह्निक
त्र्याह्निक विषमज्वरेणगृह्यते तत्क्षणादेवनश्यतिनात्रसं
शयः ॐ वं भुवनत्रयं ह्रीं ह्रीं अमुकस्यआत्मानंनित्यज्वरेणाप
ह्रीं वं पचमात्रसोस्फुरस्वाहा इतिनित्यज्वरशोषणयंत्रिका ॥
ॐ ह्रः स्वाहा। अनेनमंत्रेणमंत्रितं जलंकृशोकृत्वा ज्वरितांगसे
कयेत् तेनज्वरविमुक्तिर्भवतिनिश्चितं रवावानरसिंहस्यक्रो।
मादेवानुशासनं अस्तितरगगातोवायुर्नोमूतस्वगर्जितः र
विवारेश्लोकमिमंलिखित्वाशिरसिधारयेत् तेनत्रैमासिक
ज्वर उपशाम्यति। वस्त्रविशालस्यरुधिरंशुद्धीत्वापमसूत्रवा।
र्तिं सप्तवारनभावयेत् ततकज्जलंतैलेनशिवलिंगस्याग्रेकज्ज

उ
डामरे
प्र
तं•
१९

15

लेपानयेत् तेनअंजितनेत्रस्य अदृश्यो भवति ध्रुवं । हेमिरि
हेमिरिहे । अनेनोदकमादायालोकासहस्रवारान् परिजप्य
अनेनवांजनेनत्रिरात्रेणसिद्धिः पद्मसूत्रवर्तिकस्य तैलेन
कज्जलं पातयेत् तेनांजितनेत्रस्य दृश्यो भवति नतो गोमूत्रे
णवत्सषीप्रक्षाल्य पुनः प्रत्यक्षो भवति ॥
अथडाकिनीदमनमंत्रः अतः तां हौ काजसिनीदेवतात
त्रयूलिनी ह्योनाशालिनी भमंत्रिवंधुणनादैवतैलछुकंट
केनपुरमभिप्रणम्सनो देवत्तां महाभैरवमंडलमचलमंग
लवारेण ॐ ह्यः ह्यः ह्यः डाकिनीमतवंधु नमः ॐ नमो भ
गवते वज्राय चंडेश्वराय ह्रीं ह्रीं फट् स्वाहा इति सर्व शत्रु डाकि
नीदमनमंत्रः ॥ दमनसर्पलेग पद्मलिसिमजावंध निशि
नागपाशमचलः । इतिदमनमंत्रवंधनेव ॐ रं ह्रीं शीघ्रं
हृस्वाहा । त्रिपुरो सिंदूर गोरवचूर्णाभ्यां उदनालपत्रे लिखि
त्वा शोषयितव्यः सदिवसत्रयेणज्वरेणागत्य मिलति ॐ
अह्रोहः अमुकनाम्नीं शीघ्रमानय स्वाहा इत्याकर्षणं ॥
ॐ ह्रीं ह्रीं वलीं ह्रीं अहः फट् स्वाहा । मज्जनस्य स्थो भवति
अपमराणी अमुकीजीवतेन अनेनमंत्रेण सप्तवारं जलं
प्रजप्य कामिन्यै पानार्थं दातव्यं ॐ नमो जलमोहेश्वले

फलानि संकुले स्वाहा। ॐ अनेन मंत्रेण सप्तवाराभिमंत्रि
तेयस्य दीयते स वशो भवति। ॐ नमो जले मोहे ह्रीं अग्नि
निफट् स्वाहा। अनेन मंत्रेण ब्रह्मषेपानीयेन मुखं प्रक्षाल।
येत् सर्वजनप्रियो भवति सर्वसिद्धीश्वरो भवति ॐ भूर्भुवः
स्वः स्वाहा। नोच्छलं मंत्रयित्वा यस्य दीयते स वशो भवति।
ॐ नमो जले मोहे हन हन दह दह पच पच मथ मथ अमुकं
मे वशमानय स्वाहा।

अथ यक्षिणीसाधनमंत्रः सुरसुंदरी १ मनोहारी २ कन
कावती ३ रतिकरी ४ कामेश्वरी ५ नटी ६ अनुरागिणी
पद्मिनी ८ एता अष्टौ यक्षिण्यः कामनायां साधनम् अ
थ सुरसुंदरीसाधनम् ॐ ह्रीं आगच्छ आगच्छ सुरसुंदरी।
स्वाहा। वज्रपाणिगृहं गत्वा गुग्गुलधूपं दत्वा त्रिसंध्यं पूज
येत् सहस्रं सहस्रं सहस्रं मासपर्यंतं जपेत् ततो मासाभ्यं
तरे प्रसन्ना भवति अंतिमदिवसे रक्तचंदनेनार्घं दद्यात् त
तो आगत्य माता भगिनी भार्या भवति तासां यानि कर्माणि ता
न्येव करोति यदि माता भवति तदा सिद्धिद्रव्याणि रसायनानि
ददाति यदि भगिनी भवति एवंवदमूलां वस्त्रं ददाति यदि भा
र्या भवति तदा सर्वाणां ऐश्वर्यं परिपूरयति परं त्वं वर्जनीय

उ
डामरे
सुर
तं
१६

मिहानयासहशयनंमैथुनप्रियाभवति अन्यथाविनश्यति १ ॥
अथमनोहारीसाधनं ॐह्रींआगच्छ आगच्छमनोहारिस्वाहा
रहनदीसंगमेगत्वा चंदनेनमंडलंकृत्वा अगुरुधूपंदत्वा सहस्रै
कंमंत्रमासमेकपर्यंतंप्रत्यहंजपेत् ततोमासांतेचंदनोदकेना
र्घंदद्यात् पुष्पफलेनैकचित्तेनतस्याःअर्चनंकर्तव्यं ततोऽर्द्धरा
त्रिसमयेनियतमागच्छति तदाआगतांसम्यक्तांकरोति स्व
र्णशतंतस्मैसाधकायप्रत्यहंददाति २ ॥
अथकनकावतीसाधनम् ॐह्रींकनकावतिमैथुनप्रियेआ
गच्छआगच्छस्वाहा वटवृक्षसमीपेस्थित्वा मद्यमांसादिनैवे
द्यंतस्यैमूलमंत्रेणदत्वा शेषंस्वयमपिअंगीकृत्य सहस्रमेकंमू
लमंत्रंजपेत् एवंसप्तदिनपर्यंतंकुर्यात् अष्टमरात्रौअर्द्धरात्रि
समये वस्त्रालंकारभूषिता अष्टौपरिवारान्आदायउपगच्छति
आगतासाकामयितव्याभार्यावाभवति द्वादशजनानांवस्त्राले
कारभोजनंचददाति अष्टौकलानित्यंसाधकायप्रयच्छति ३
अथकामेश्वरीसाधनं ॐह्रींआगच्छआगच्छकामेश्वरिस्वाहा
रहगोरोचनयाभूर्जपत्रोपरिस्त्रीरूपांप्रतिमांसंलिख्य षोडशो
पचारैःपंचोपचारैर्वासंपूज्य ततःशय्यायामेकाकीएकांतेउप
विश्य तन्मनाभूत्वासहस्रंजपेत् ततोमासांतेनतुष्टासकी।

घोंद्वारोष्टजयेत् ततो मधुसर्पिर्भ्यां प्रतिरात्रे दीपं प्रज्वाल्य पश्चा
त् मौनेन कृत्वा मूलमंत्रं सहस्रसंख्यकं जपेत् ततोऽर्द्धरात्रिसम
ये नियतमागच्छति परं तु अन्या स्त्री वर्जनीया ४
अथ रतिप्रियासाधनं ॐ ह्रीं आगच्छ आगच्छ रतिकरि स्वाहा
अत्र पटे चित्ररूपिणी लेख्या वस्त्रकनकालंकारभूषिता उत्प
लहस्ता कुमारी जातीपुष्पैः प्रपूजनं कुर्य्यात् गुग्गुलेन धूपं
दद्यात् ततोष्टसहस्रं प्रत्यहं जपेत् ततो मासांते विधिवत्पू
जां कुर्यात् तस्मिन्दिने धूपदीपः प्रज्वालनीयः ततोऽर्द्धरात्रि
समये वश्यमागच्छति आगता सा स्त्री भावेन कामयितव्या।
भार्य्या भवति साधकस्य परिवारं पालयति दिव्यं कामि
कं भोजनं च ददाति ५ ॥
अथ पद्मिनीसाधनम् ॐ ह्रीं आगच्छ आगच्छ पद्मिनि स्वाहा स्व
गृहे चंदनेन मंडलं कृत्वा शिरःस्पं कारयेत् गुग्गुलेन धूपं दत्वा सह
स्रमेकं प्रत्यहं जपेत् ततो मासांते पौर्णमास्यां रात्रौ विधिवत्पूजनं।
कृत्वा जपेत् ततो जपांते ऽर्द्धरात्रिसमये नियतमागच्छति आग।
ता सा कामयितव्या भार्य्या भूत्वा सर्वकामप्रदा भवति रसं रसा
यनं सिद्धद्रव्यं प्रत्यहं साधकाय प्रयच्छति ६
अथ नटीसाधनं ॐ ह्रीं आगच्छ आगच्छ नटि स्वाहा अत्राशोक

उ
डामरे
श्वर
तं. १२

वृक्षतलेगत्वा मत्स्यमांसाद्याहारं गंधपुष्पादिधूपदीपबलिंद-
त्वा सहस्रं प्रत्यहं जपेत् ततोमासांतेसा नियतमागच्छति आ-
गतासामाता भगिनी भार्य्याचभवति यदिमाताभवति तदा
दिव्यंकामिकंभोजनंददाति। यदिभगिनीभवति तदाशतयो-
जनादुत्तमांस्त्रियमानीयतस्मैसमर्पयति। यदिभार्य्याभवति त-
दादिव्यवस्त्रंरसायनंअष्टदिनपश्चाद्ददाति ७ ॥
अथानुरागिणीसाधनं ॐ ह्रीं अनुरागिणी आगच्छ आगच्छ स्वा-
हा रहकाश्मीरकुंकुमेन भूर्जपत्रे स्त्रीसदृशीं प्रतिमां विलिख्य
आवाहनादिकंकृत्वा गंधपुष्पधूपदीपादिकंदत्वा तांबूलानि
निवेद्य ततःसहस्रंप्रत्यहंजपेत् मासमेकंयावत् त्रिसंध्यं।
जपेत् ततोमासांतेपौर्णमास्यांविधिवत्पूजांकृत्वा धूपदीपं
प्रज्वाल्य समग्ररात्रौमंत्रंजपेत् ततःप्रभातसमयेनियतमा-
गच्छति आगतासासर्वकामप्रदाभवति दिव्यरसायनानि
ददाति ततोदीनाराणांसहस्रंप्रत्यहंददाति तस्याःप्रसा-
देनवर्षसहस्राणिआयुष्यंभवति ८ ॥
अथषट्त्रिंशत्यक्षिण्यः। विचित्राविभ्रमाहंसीभीषणी
जनरंजिका विशालामदनाघंटाकालकर्णीमहाभया मा-
हेंद्रीशंखिनीचांद्रीश्मशानावटयक्षिणी मेखलाविकला।

लक्ष्मीर्मानिनीशतपत्रिका सुलोचनासुशोभाप्याकपालीचवि।
शालिनी नटीकामेश्वरीस्वर्णरेखाचसुरसुंदरी मनोहराप्रमो।
दासुरागिणीनखकेशिका भौमिनीपद्मिनीचैवस्वर्णदेवीरति।
प्रिया षट्त्रिंशदेतायक्षिण्यःकथिताःसिद्धिकामदाः कंकिणी
मतेतंत्रेमहादेवेनविस्तरात् आराधनंमहत्तासांप्रवक्ष्यामिस
मासतः ॥ फलेचैवयथातुष्टाप्रयच्छतिसमाहितं लक्षद
यंजपेन्मंत्रंवटवृक्षतटेशुचिः पश्चात्त्वंपकपुष्पैश्चहोमंमधु।
युक्तावितं कुर्याद्दशांशतोमंत्रीशंकरेणोदितायथा ततः।
सिद्धाभवेद्देविविविचित्रावांछितप्रदा ॐविचित्रेविचित्ररूपिणी।
मेसिद्धिंकुरुकुरुस्वाहा इतिमंत्रः १
लक्षद्वयंजपेन्मंत्रंश्मशानेनिश्चितेनिशि हुत्वार्कैर्गुग्गुलैर्हो
मैर्दशांशेनकृतेसति विभ्रमानोषमायातिपंचाशन्मानुषैः
समं ददातिभोजनंद्रव्यंप्रत्यहंशंकरोऽब्रवीत् ॐह्रींविभ्रमे
विभ्रमरूपेविभ्रमंकुरुकुरुह्रींभगवतिस्वाहा २
प्रवेशेनगरस्याथलक्षमेकंजपेन्मनुं पद्मपत्रैःहुतोपेतेकृते
होमैर्दशांशतः प्रपंचव्यंजनंहंसीयेनपश्यतिश्रुतिनिधिं सुवे
नतेचरक्षातिनविघ्नैःपरिभूयते ॐह्रींनमोहंसिहंसवा।
हिनिक्लींक्लींस्वाहा ३ ॥

३
उमरे
श्वर
तं०
१८

त्रिपथस्थो जपेन्मंत्रं लक्षसंख्यं दशांशतः हुताक्रगुग्गुलैर्होमै।
भीषणी चिंतितप्रदा ॐ ऐं ह्रीं महामोदे भीषणि ह्रीं ह्रीं स्वाहा ४
कंदेवायो जपेन्मंत्रं त्रिशिलक्षद्वयं ततः हुताक्रगुग्गुलैर्होमैर्देवी
सौभाग्यदा भवेत् ॐ ह्रीं क्लीं जनरंजके स्वाहा ५ ॥
बिंबीवृक्षतले मंत्रं लक्षमावर्तयेच्छुचिः शतपत्रोद्भवैः पुष्पैः स
